✧˖°*❋ ❋*°˖✧

# नाम रामायणम
# (Nama Ramayanam)

✧˖°*❋ ❋*°˖✧

# नाम रामायणम

## ॥ बालकांडः ॥

शुद्धब्रह्मपरात्पर राम ।
कालात्मकपरमेश्वर राम ।
शेषतल्पसुखनिद्रित राम ।
ब्रह्माद्यमरप्रार्थित राम ।
चंडकिरणकुलमंडन राम ।
श्रीमद्दशरथनंदन राम ।
कौसल्यासुखवर्धन राम ।
विश्वामित्रप्रियधन राम ।
घोरताटकाघातक राम ।
मारीचादिनिपातक राम । 10 ।
कौशिकमखसंरक्षक राम ।
श्रीमदहल्योद्धारक राम ।
गौतममुनिसंपूजित राम ।
सुरमुनिवरगणसंस्तुत राम ।
नाविकधाविकमृदुपद राम ।
मिथिलापुरजनमोहक राम ।
विदेहमानसरंजक राम ।
त्र्यंबककार्मुखभंजक राम ।
सीतार्पितवरमालिक राम ।
कृतवैवाहिककौतुक राम । 20 ।
भार्गवदर्पविनाशक राम ।
श्रीमदयोध्यापालक राम ॥

राम राम जय राजा राम ।
राम राम जय सीता राम ॥

**॥ अयोध्याकांडः ॥**

अगणितगुणगणभूषित राम ।
अवनीतनयाकामित राम ।
राकाचंद्रसमानन राम ।
पितृवाक्याश्रितकानन राम ।
प्रियगुहविनिवेदितपद राम ।
तत्क्षालितनिजमृदुपद राम ।
भरद्वाजमुखानंदक राम ।
चित्रकूटाद्रिनिकेतन राम । 30 ।
दशरथसंततचिंतित राम ।
कैकेयीतनयार्पित राम ।
विरचितनिजपितृकर्मक राम ।
भरतार्पितनिजपादुक राम ॥

राम राम जय राजा राम ।
राम राम जय सीता राम ॥

**॥ अरण्यकांडः ॥**

दंडकावनजनपावन राम ।
दुष्टविराधविनाशन राम ।
शरभंगसुतीक्ष्णार्चित राम ।
अगस्त्यानुग्रहवर्दित राम ।
गृध्राधिपसंसेवित राम ।

पंचवटीतटसुस्थित राम । 40 ।
शूर्पणखार्त्तिविधायक राम ।
खरदूषणमुखसूदक राम ।
सीताप्रियहरिणानुग राम ।
मारीचार्तिकृताशुग राम ।
विनष्टसीतान्वेषक राम ।
गृध्राधिपगतिदायक राम ।
शबरीदत्तफलाशन राम ।
कबंधबाहुच्छेदन राम ॥

राम राम जय राजा राम ।
राम राम जय सीता राम ॥

## ॥ किष्किंधाकांडः ॥

हनुमत्सेवितनिजपद राम ।
नतसुग्रीवाभीष्टद राम । 50 ।
गर्वितवालिसंहारक राम ।
वानरदूतप्रेषक राम ।
हितकरलक्ष्मणसंयुत राम ।
राम राम जय राजा राम ।
राम राम जय सीता राम ।

## ॥ सुंदरकांडः ॥

कपिवरसंततसंस्मृत राम ।
तद्गतिविघ्नध्वंसक राम ।
सीताप्राणाधारक राम ।
दुष्टदशाननदूषित राम ।
शिष्टहनूमद्भूषित राम ।
सीतावेदितकाकावन राम ।
कृतचूडामणिदर्शन राम । 60 ।
कपिवरवचनाश्वासित राम ॥

राम राम जय राजा राम ।
राम राम जय सीता राम ॥

## ॥ युद्धकांडः ॥

रावणनिधनप्रस्थित राम ।
वानरसैन्यसमावृत राम ।
शोषितशरदीशार्त्तित राम ।
विभीष्णाभयदायक राम ।
पर्वतसेतुनिबंधक राम ।
कुंभकर्णशिरश्छेदक राम ।
राक्षससंघविमर्धक राम ।
अहिमहिरावणचारण राम ।
संहृतदशमुखरावण राम । 70 ।
विधिभवमुखसुरसंस्तुत राम ।
खःस्थितदशरथवीक्षित राम ।
सीतादर्शनमोदित राम ।
अभिषिक्तविभीषणनत राम ।

पुष्पकयानारोहण राम ।
भरद्वाजादिनिषेवण राम ।
भरतप्राणप्रियकर राम ।
साकेतपुरीभूषण राम ।
सकलस्वीयसमानत राम ।
रत्नलसत्पीठास्थित राम । 80 ।
पट्टाभिषेकालंकृत राम ।
पार्थिवकुलसम्मानित राम ।
विभीषणार्पितरंगक राम ।
कीशकुलानुग्रहकर राम ।
सकलजीवसंरक्षक राम ।
समस्तलोकाधारक राम ॥
राम राम जय राजा राम ।
राम राम जय सीता राम ॥

**॥ उत्तरकांडः ॥**

आगत मुनिगण संस्तुत राम ।
विश्रुतदशकंठोद्भव राम ।
सीतालिंगननिर्वृत राम ।
नीतिसुरक्षितजनपद राम । 90 ।
विपिनत्याजितजनकज राम ।
कारितलवणासुरवध राम ।
स्वर्गतशंबुक संस्तुत राम ।
स्वतनयकुशलवनंदित राम ।
अश्वमेधक्रतुदीक्षित राम ।
कालावेदितसुरपद राम ।
आयोध्यकजनमुक्तित राम ।
विधिमुखविभुदानंदक राम ।

तेजोमयनिजरूपक राम ।
संसृतिबंधविमोचक राम । 100 ।
धर्मस्थापनतत्पर राम ।
भक्तिपरायणमुक्तिद राम ।
सर्वचराचरपालक राम ।
सर्वभवामयवारक राम ।
वैकुंठालयसंस्तित राम ।
नित्यनंदपदस्तित राम ॥

राम राम जय राजा राम ॥
राम राम जय सीता राम ॥ 108 ॥

**इति श्रीलक्ष्मणाचार्यविरचितं नामरामायणं संपूर्णम् ।**

≪ · ◦ ❈ ◦ · ≫

# || Baalakaandah ||

Shuddhabrahmaparaatpara Raama |
Kaalaatmakaparameshvara Raama |
Sheshatalpasukhanidrita Raama |
Brahmaadyamarapraarthita Raama |
Chandakiranakulamandan Raama |
Shrimaddasharathanandan Raama |
Kausalyaasukhavardhana Raama |
Vishwamitrapriyadhana Raama |
Ghorataatakaaghaataka Raama |
Maarichadinipaataka Raama | 10 |
Kausikamakhasamrakshaka Raama |
Shrimadahalyoddhaarak Raama |
Gautammunisampujita Raama |
Suramunivaraganasanstuta Raama |
Naavikadhaavikamridupada Raama |
Mithilapurajanamohaka Raama |
Videhamaanasaranjaka Raama |
Tryambakakarmukhabhanjaka Raama |
Seetaarpitavaramaalika Raama |
Kritavaivaahikakautuka Raama | 20 |
Bhaargavadarpa vinaashaka Raama |
Shrimadayodhyaapaalaka Raama ||

Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Ayodhyaakaandah ||

Agaṇitagunagaṇabhuushita Raama |
Avaneetanayaakaamita Raama |
Raakaachandrasamaanana Raama |
Pitruvaakyaashritakaanana Raama |
Priyaguhaviniveditapada Raama |
Tatkshaalitanijamridupada Raama |
Bharadwaajamukhaanandaka Raama |
ChitrakootaadriNiketana Raama | 30 |
Dasharathasantatachintita Raama |
Kaikeyeetanayaarpita Raama |
Virachitanijapitrkarmaka Raama |
Bharataarpitanijapaaduka Raama ||

Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Aranyakandah ||

Dandakavanajanapaavana Raama |
Dushtaviraadhavinaashana Raama |
Sharabhangasutikshnaarchita Raama |
Agastyaaugrahavardita Raama |
Gridhradhipasamsevita Raama |
PanchavateeTatasusthita Raama | 40 |
Shurpanakhaarttividhaayaka Raama |
Kharadooshanamukhasoodaka Raama |
Seetaapriyaharinaanuga Raama |
Maarichaartikritashuga Raama |
Vinashtaseetaanveshaka Raama |
Gridhradhipagatidaayaka Raama |
Shabareedattaphalaashana Raama |

Kabandhabaahucchhedana Raama ||

Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Kishkindhaakandah ||

Hanumatssevitanijapada Raama |
Natasugreevaabhishtada Raama | 50 |
Garvitavaalisamhaaraka Raama |
Vanaradootapreshaka Raama |
Hitakaralakshmanasanyuta Raama |
Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Sundarakandah ||

Kapivarasantatasamsmrita Raama |
Tadgativighnadhvamsaka Raama |
Seetaapranadhaaraka Raama |
Dushtadashaanandushita Raama |
Shishtahanumadbhooshita Raama |
Seetaaveditakaakaavan Raama |
Kritachoodaamanidarshana Raama | 60 |
Kapivaravachanaashvaasita Raama ||

Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Yuddhakandah ||

Raavananidhanaprashtita Raama |
Vaanasainyasamaavrita Raama |
Shoshitasharadeeshartita Raama |
Vibheeshnaabhayadaayaka Raama |
Parvatsaetunibandhaka Raama |
Kumbhakarnashirashchedaka Raama |
Raakshasasanghavimardhaka Raama |
Ahimahiraavanachaarana Raama |
Samhritadashamukharavana Raama | 70 |
Vidhibhavamukhasurasamstuta Raama |
Khashtitadasharathaveekshit Raama |
Seetaadarshanamodita Raama |
Abhishiktavibheeshanana Raama |
Pushpakayaanarohan Raama |
Bharadwaajaadinishevana Raama |
Bharatapranapriyakara Raama |
SaaketaPuribhooshana Raama |
Sakalasweeyasamaanata Raama |
Ratnalasatpeethaasthita Raama | 80 |
Pattaabhishekaalamkrita Raama |
Paarthivakulasammanita Raama |
Vibheeshanaarpitarangaka Raama |
Keeshakulaanugrahaka Raama |
Sakalajeevasamrakshaka Raama |
Samastalokaadhaarak Raama ||
Raama Raama Jaya Raja Raama |
Raama Raama Jaya Seeta Raama ||

# || Uttarakaandah ||

Aagata munigaNa samstuta Raama |
Vishrutadashakanthodbhava Raama |
Seetaalinganirvruta Raama |
Neetisurakshitajanapada Raama | 90 |
Vipinatyaajitajanakaja Raama |
Karitalavanaasuravadha Raama |
Svargatatshambuka samstuta Raama |
Svatanayakushalavanandita Raama |
Ashwamedhakratudikshita Raama |
Kaalaveditasurapada Raama |
Aayodhyakajanamuktita Raama |
Vidhimukhavibhudaanandaka Raama |
Tejomaynijaroopaka Raama | 100 |
Samsritibandhavimochaka Raama |
Dharmasthaapanatatpara Raama |
Bhaktiparayanamuktida Raama |
Sarvacharacharapaalaka Raama |
Sarvabhavaamayavaaraka Raama |
Vaikunthalayasamstita Raama |
Nityanandapadasthita Raama ||

Raama Raama Jaya Raja Raama ||
Raama Raama Jaya Seeta Raama || 108 ||

**Iti Shree Lakshmanaacharyavirachitam NaamaRaamaayanam Sampurnam ||**

✧˳·˖˖˖˖°*❋ ❋*°˖˖˖˖·˳✧